हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समा-
क्षिकः ॥”
अपि च ।
“चन्द्रप्रभा वचा मुस्ता भूनिम्बं सुरदारु च ।
हरिद्रातिविषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
धन्याकं त्रिफला चव्यं विडङ्गं गजपिप्पली ।
स्वर्णमाक्षिकं योषं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षहतलोहं स्याच्चतुःकर्षा सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभातिविख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥”
इत्यादि भावप्रकाशः ॥
( तथास्य लक्षणान्तरम् ।
“तन्तुबद्धमिवालालं पिच्छिलं यः प्रमेहति ।
लालामेहिनं विद्यात्तं नरं श्लेष्मकोपतः ॥”
इति चरके निदानस्थाने चतुर्थेऽध्याये ॥ )

लालायितः, त्रि, लालाविशिष्टः । कातर इति यावत् । लालाशब्दात् नमस्तपोवरिवः कण्ड्वादिभ्यः क्यः कृतौ इति मुग्धबोधव्याकरणसूत्रेण क्यप्रत्यये कृते क्तप्रत्ययाभिष्पन्नः । यथा । अत्र लालायितः फणी । इति अनन्तदेवोक्तगणेशलिखितपाणिनिव्याकरणीयमहाभाष्यम् ॥
अपि च ।
“परिखावलयच्छलेन या
न परेषां ग्रहणस्य गोचरः ।
फणिभाषितभाष्यफक्किका
विषमा कुण्डलनामवापिता ॥”
इति पूर्व्वनैषधे २ सर्गः ॥
परिखेति । शत्रूणां ग्रहणगोचरो नेयमिति कृत्वा परिखावलयव्याजेन या पुरी कुण्डलनां प्रापिता विधात्रेति शेषः । फणिना भाषिता या महाभाष्यफक्किका तद्वद्विषमा सापि परेषां ज्ञानगोचरो नेयमिति कृत्वा अत्र लालायितः फणीत्येवं कुण्डलनां प्रापिता पण्डितैरिति शेषः । इति भवदत्तकृततट्टीका ॥

लालाविषः, पुं, (लालायां विषं यस्य ।) लूतादिः । इति हेमचन्द्रः । ४ । ३७८ ॥

लालास्रावः, पुं, ( लालां स्रावयतीति । स्रु + णिच् + अण् । ) ऊर्णनाभः । इति हेमचन्द्रः । ( लालास्रावके, त्रि । यथा, सुश्रुते । २ । १६ ।
“लालास्रावी स विज्ञेयः कण्डूमान् शौषिरो गदः ॥” )

लालिकः, पुं, महिषः । इति हेमचन्द्रः ।४।३४८॥

लालित्यं, क्ली, (ललित + ष्यञ् ।) ललितस्य भावः । यथा,—
“प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन् स्मृत-
स्तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम् ।
पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम् ॥”
इति लीलावती ॥

ला(व)वः, पुं स्त्री, पक्षिविशेषः । लाओया इति भाषा । इत्यमरभरतौ ॥ ( यथा, सुश्रुते ।४।८।
“ग्राम्यानूपोदकैर्म्मांसैर्लावाद्यैर्व्वापि विष्किरैः ॥”)
अस्य मांसगुणाः । लघुत्वम् । कटुत्वम् । मलबद्धकारित्वम् । स्वादुत्वम् । शीतत्वम् । त्रिदोषनाशित्वञ्च । इति राजवल्लभः ॥ ( तथा च ।
“संग्राही दीपनश्चैव कषायो मधुरो लघुः ।
लावः कटुविपाकश्च सन्निपाते च पूजितः ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
( यथास्य गुणपर्य्यायौ ।
“लावा विष्किरवर्गेषु ते चतुर्द्धा मता बुधैः ।
पांशुलो गौरकोऽन्यस्तु पौण्ड्रकोदर्भरस्तथा ॥
लावा वह्निकराः स्निग्धा गरघ्ना ग्राहिका हिताः ॥
पांशुलः श्लेष्मलस्तेषु वीर्य्योष्णोऽनिलनाशनः ।
गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् ॥
पौण्ड्रकः पित्तकृत् किञ्चिल्लघुवातकफापहः ।
दर्भरो रक्तपित्तघ्नो हृद्रामयहरो हिमः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

ला(व)वकः, पुं, (लाव एव । स्वार्थे कन् ।) लावपक्षी । तत्पर्य्यायः । लघुजङ्गलः २ । इति त्रिकाण्डशेषः ॥ (तथास्य मांसगुणाः ।
“पक्षिणाञ्च महाश्रेष्ठो लावको जाङ्गलात्मकः ।
संग्राही दीपनः प्रोक्तः कषायो मधुरो लघुः ।
तथा विपाके मधुरः सन्निपातेऽतिपूजितः ॥”
इति हारीते प्रथमे स्थाने एकादशेऽध्याये ॥
यथा, सुश्रुते । ४ । ३८ ।
“विरिक्तवान्तैर्हरिणैणलावकाः
शशाश्च सेव्याः समयूरतित्तिरिः ॥”
लुनातीति । लू + ण्वुल् । छेदकः । यथा, मार्कण्डेये । ४६ । १६ ।
“यथा प्राणव्यापकः क्षेत्री पालको लावकस्तथा ॥”)

लावणं, त्रि, (लवण + अण् ।) लवणेन संस्कृतम् । यथा,—
“सार्पिष्कं दाधिकं सर्पिर्दधिभ्यां संस्कृतं क्रमात् ।
लवणोदकाभ्यामुदकं लावणिकमुदश्वित ।
औदश्वितमौदश्वितकं लवणे स्यात्तु लावणम् ॥”
इति हेमचन्द्रः ॥
लवणसम्बन्धि च । ( यथा, हरिवंशे ।५३।२० ।
“स मां परिभवन्नेव स्वां वेलां समुपाक्रमन् ।
क्लेदयामास चपलैर्लावणैरम्बुविस्रवैः ॥” )
नस्ये, स्त्री । इति रत्नमाला ॥

लावणिकं, त्रि, ( लवण + ठञ् । ) लवणेन संस्कृतम् । इति हेमचन्द्रः ॥ लवणसम्बन्धि च । लवणविक्रेतरि, पुं । ( यथा, माघे । १० । १८ ।
“लीलयैव सुतनोस्तुलयित्वा
गौरवाढ्यमपि लावणिकेन ॥” )
लवणपात्रे, स्त्री । इति केचित् ॥

लावण्यं, क्ली, ( लवण + ष्यञ् । ) लवणत्वम् । लवणस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् । ( लवणा त्विट् विद्यते यस्येति लवणः । अर्श-आदिभ्योऽच् । तस्य भावः । दृढादित्वात् ष्यञ् । यद्वा, लवणा त्विट् सैव । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् । ) सौन्दर्य्यविशेषः । तस्य लक्षणं यथा,—
“मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥”
इत्युज्ज्वलनीलमणिः ॥
तथा हि ;
“नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां धृति-
र्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम् ।
लावण्यं वपुषः स्मृतिस्तु मनसा शान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मण्डनम् ॥”
इति नवरत्नान्तर्गतामरसिंहः ॥
( शीलनैपुण्यादि । अस्य प्रमाणं लावण्यार्जितशब्दे द्रष्टव्यम् ॥ )

लावण्यार्जितं, स्त्री, (लावण्येन अर्जितम् ।) विवाहकालीनं श्वशुराभ्यां दत्तं धनम् । यथा,—
“शीला दत्तञ्च यत्किञ्चित् श्वश्र्वा वा श्वशुरेण वा ।
पादवन्दनिकं यत्तल्लावण्यार्जितमुच्यते ॥”
इति विवादचिन्तामणिधृतकात्यायनवचनम् ॥
लावण्यं शीलनैपुण्यादि । तथा च पादप्रणतायै शीलादिमत्यै वा स्त्रियै श्वशुरादिना दत्तं तृतीयं स्त्रीधनमित्यर्थः । इति तद्व्याख्यानम् ॥

लावा, स्त्री, (लाव + टाप् ।) पक्षिविशेषः । तत्पर्य्यायः । लावकः २ लावः ३ लवः ४ । अस्या मांसगुणाः । पथ्यत्वम् । ग्राहित्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥

लाबुः, }
लाबूः, } स्त्री, अलाबुः । इति शब्दरत्नावली ॥

लासः, पुं, ( लस् + घञ् । ) नृत्यमात्रम् । स्त्रीणां नृत्यम् । इति शब्दरत्नावली ॥ ( यथा, ऋतुसंहारे । ६ । ३१ ।
“मदनजनितलासैर्दृष्टिपातैर्मुनीन्द्रान्
स्तनभरनतनार्य्यः कामयन्ति प्रशान्तान् ॥”)
यूषः । इति शब्दचन्द्रिका ॥

लासकं, स्त्री, (लसतीति । लस + ण्वुल् ।) मट्टकम् । इति हारावली ॥ मट्का इति भाषा ॥

लासकः, पुं, ( लसतीति । लस + ण्वुल् । ) लास्यकारी । मयूरः । लषकः । इति मेदिनी । के, ॥ शैलः । इति धरणिः ॥ ( दीपिकारकः । यथा, ऋतुसंहारे । २ । २६ ।